① विषय - भागवत No-62
पेज - 1
- 32×13.3×0.1 c.m.

श्री मते रामानुजायनमः निर्हेतुक भगवत्कटाक्षेण
... ...
प्रापितः अपहृत वेदो नेत्रभ्रष्टो धनभ्रष्टइति
भ्रमिमुल्ली

---

② विषय - श्राद्ध
पेज - 1
- 16.5×12×0.1 c.m.

यवजलान्यादाय ओं अद्यामुकगोत्राणांपितृ पितामह
... ...
तौतोऽपसव्यं सोदकतिलजलान्यादाय ओं

---

③ विष्णु सहस्र नाम स्तोत्र
र: सुंदोरतनाम: अक्रोंवाजलन: छंगी जयत:
... ...

अरोड़ हुंडलीचक्री विक्रम्मूर्जित शासन:

पेज - 2

- २२.५ × 20.6 × 0.1 c.m.

श्रीमते रामानुजाय नमः ॥ निर्हेतुकभगवत्कटाक्षेण ज्ञातसुकृतं भवति ॥ तदुत्पत्त्यनंतरं भगवद्भागवतविषये च्छाद्वेषाभिमुख्यं जायते ।
तदनंतरं त्याज्योपादेयविभागज्ञानकौतुकं भवति ॥३॥ तेन सदाचार्यसमाश्रयणं भवति ४॥ तदनंतरं त्याज्योपादेयावि निश्चयो भव
ति ॥५ तदनंतरं प्राप्यान्तरवैराग्यं परमप्राप्याभिनिवेशश्च भवति ॥६॥ अनंतरं प्राप्यान्तरनिवृत्तेः परमप्राप्यातिदेशस्य हेतुतया
सिद्धोपायस्वीकारो भवति ७॥ अनंतरं परमप्राप्ये त्वरा भवति ॥८॥ अनंतरं महत्स्वरामीसुतप्रकारेणेश्वरस्तुतिविषयग
भवति ९॥ अनंतरं वागादिलयो भवति ॥१०॥ अनंतरं सूक्ष्मशरीरपरिष्वंगो भवति ११ अनंतरं सावरणातिक्रमणं भवति १२
अनंतरं प्रकृत्यादिलंघनं भवति १३॥ अनंतरमकालकल्यादिदिव्यदेशप्राप्तिर्भवति ॥१४ अनंतरं माहृदस्नानं भवति १५
अनंतरं विरजास्नानं भवति ॥१६ अनंतरं सूक्ष्मशरीरविश्लेषो भवति १७ अनंतरममानवकरस्पर्शो भवति १८ अनंतरमपहत
पापत्वादिगुणप्रादुर्भावो भवति १९॥ अनंतरं दिव्यअमानवसंकल्पकल्पितदिव्यदेहप्रवेशो भवति २० अनंतरं दिव्यसरस्सं
गमन्कारो भवति २१॥ अनंतरं दिव्यालंकारो [illegible]ति ॥२२॥ अनंतरं दिव्यविमानारोहणं भवति २३॥ अनंतरं तिलकांतारप्र
वेशो भवति ॥ अनंतरं सालोक्यप्राप्तिर्भवति २५॥ [illegible]ख्यादिव्यमंडपारोहणं भवति ॥ अनंतरं ब्रह्मालयप्रवेशो भवति ॥२७ अ
नंतरं दिव्यनगरप्राप्तिर्भवति ॥२८॥ अनंतरं ब्रह्मतेजःप्रवेशो भवति ॥२९॥ अनंतरं राजमार्गगमनं भवति ३०॥ अनंतरं प्राकृ
नगोपुरप्राप्तिर्भवति । अनंतरं ब्रह्मवेश्मप्रवेशो भवति । अनंतरं सूरिपरिषत्प्रत्युद्गमनं भवति । अनंतरं दिव्यमंडपमा
सीभवति ॥ अनंतरं सर्वेश्वरदर्शनं भवति । अनंतरं स्तुतिप्रणामांजलिप्रमुखेन संभ्रमानुवर्तनं भवति ॥३५ अनंत
रं परमात्मसमीपप्राप्तिर्भवति ३७॥ अनंतरं पादपीठपर्यंकारोहणं भवति ३८॥ अनंतरं भगवदुत्संगसंगो भवति ॥३९ अनं
नंतरं आलोक्यालापाद्यनुभवो भवति [illegible] ॥ अनंतरं मालिंगनाद्यनुभवो भवति ॥ अनंतरं [illegible]

१ अनंतरमनुभवजनितप्रीतिप्रकर्षो भवति॥ ७२ [illegible] नंतरं नानाविधाविर्भावहेतुर्भवति ७४ अनंतं सर्वदेशसर्वकालसर्वाव
स्थोचितसर्वप्रकारैः कैंकर्यं भवति॥ ७५ ॥ लोकाचार्यान्निर्वहति लेशतोपि इति [illegible] प्रमेयशेखरं समाप्तम् श्रीमते रा
मानुजाय नमः॥ लोकाचार्यपदाग्रे कृपया दत्तमनवे संसारभीतिं हृदि सुनिवासान वैनमः॥१॥ मुमुक्षोर्भोग्यं सर्वेश्वर
माश्रयतोऽनन्यगतित्वमाकिंचन्यं चापेक्षितं अनन्यगतित्वं नाम कलत्रापत्यं कलत्रपतोलिवापकलैकरणमति
लेषु दुःखेनिवर्तयमानानिवर्तकांतररहितरक्षकसुत्तप्रकारेण सर्वेश्वरं विनान्यो रक्षकोनास्ति इतिस्थितिः मातृपुत्र
मातापितृब्रह्मरुद्रादयो रक्षका न भवंतीति किमिति चेत् भ्रातरो रक्षका न भवंतीति वालिविषये रावणविषये च द्रष्ट
व्यं पुत्रा रक्षका न भवंतीति कंसविषये हिरण्यविषये च द्रष्टव्यं मातापितरौ रक्षका न भवंतीति कैकेयीविषये हिरण्यावि
षये च द्रष्टव्यं मातापितृभ्यां पोषणाविरोधीति उपेक्षणं तामकाले मनुष्यं दृष्ट्वा गुल्मेस्थापनं वीक्षिप करणं विष
दानमनेकनादरस्मरणं अर्पितेत्याग्यर्थं परेभ्यः प्रतिदानं मरणावस्थायां अपावशिष्ट भ्रातिचेत् वदवदेति
पतितः स्थित्वेश्वरं स्मृत्वा नीरसपानप्राप्नुयात् नवालापविलापादिक्षिपते स्त्रीणां भर्तारो रक्षका न भवंतीति
धर्मपुत्रादिविषये नलविषये द्रष्टव्यम् एतेषां रक्षकत्वाभावेपि लोकानां दृष्टि पदो वंशादिपौर रक्षको न भवतः
किमिति चेत् तो चेश्वरास्वामीत्या स्वयं स्वेच्छालंकार्मल व्याघातकावधितिपमेनोद्यात्तमनमे साध्याहिरण्यरावण
दिरक्षवशौ तेषां नीचवृत्तिं कुर्वाणौ संचरतोऽतस्तो रक्षकौ न भवतः त्रैलोक्यस्येश्वर इंद्रस्य स्वपदं कदाचिद्गलतीति भी
तः शापोपहतो ब्रह्महत्ययाभिभूत इंद्रजित्तेन बद्धः महाबलिप्रभृतिभिरपहृतैश्वर्यः अवदग्धमुनेत्रो नम्राशिराः
संचरतीति नारक्षकः ब्रह्मा च मधुकैटभाभ्यां क्लेशं प्रापितः अपहृतवेदो नेत्रभ्रष्टो धनभ्रष्ट इति मत्वा मिमुल्ल

यवजलान्यासाय ॐ अद्यामुकगोत्राणांपितृ
पितामहप्रपितामहानाममुकामुक शर्मणां
तीर्थश्राद्धसंबंधिनोविश्वेदेवाइदमासनंवो
नमः इ सुपरमृत्सृजेत् ॥ ततोऽपसव्यंकृत्वा
पातितवामजानुर्दक्षिणाभिमुखोद्दिगुणभु
ग्नकुशद्वयतिलजलान्यादाय ॥ पूर्वं प क्रमा
सादितमोदकरूपाणिषडासनानि ति तज
लप्रोक्षिता नि प्रत्येकं पित्रादिभ्यः क्रम
त आरभ्योत्सृजेत् ततोक्रमः ॐ अद्याम
कगोत्रपितरमुकशर्मन्तीर्थश्राद्धे इदमास

३ नेतेस्वधा ॥ एवमेवपितामहादिभ्योपिस्वा
सनंदत्वाततः सव्येकृत्वा यवकुशजलैगं
धादिदानं ॐ अद्यामुकगोत्राःपितृपिता
महप्रपितामहानाममुकामुकशर्मणांती
र्थश्राद्धसंबंधिनो विश्वेदेवाएतानिगंध
पुष्पधूपदीपताम्बूलयज्ञोपवीतवासांसि
वोनमः इतिपश्चात्समवमूत्रेजेतएवमे
वमातामहादिविश्वेदेवेभ्यो पिदद्यात्ततो
ऽपसव्यं सोदकतिलजलान्यादाय ॐ अ
द्यामुकगोत्र पितृपितामहप्रपितामहा ३

रः सुंदरो रत्ननाभः सुलोचनः अर्को वाजसनः शृंगी जयंतः सर्वविज्जयी ८५
सुवर्णबिंदुरक्षोभ्यः सर्ववागीश्वरेश्वरः महाह्रदो महागर्त्तो महाभूतो म
हानिधिः ८६ कुमुदः कुंदरः कुंदः पर्जन्यः पावनोनिलः अमृतांशोमृ
तवपुः सर्वज्ञः सर्वतोमुखः ८७ सुलभः सुव्रतः सिद्धः शत्रुजिच्छत्रु
तापनः न्यग्रोधोदुंबरोश्वत्थश्चाणूरांध्रनिषूदनः ८८ सहस्रार्चिः
सप्तजिह्वः सप्तैधाः सप्तवाहनः अमूर्त्तिरनघोचिंत्यो भयकृद्भयनाश
नः ८९ अणुर्बृहत्कृशः स्थूलो गुणभृन्निर्गुणो महान् अधृतः स्व
धृतः स्वास्यः प्राग्वंशो वंशवर्द्धनः ९० भारभृत्कथितो योगी योगीशः स

वि० स०
८

र्वकामदः आश्रमः श्रवणः क्षामः सुपर्णो वायुवाहनः ८१ धनुर्धरो ध
नुर्वेदो दंडो दमयिता मैदः अपराजितः सर्वसहो नियंता नियमो यमः ८२
सत्ववान्सात्विकः सत्यः सत्यधर्मपरायणः अभिप्रायः प्रियार्होर्हः
प्रियकृत्प्रीतिवर्द्धनः ८३ विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः
रविर्विरोचनः सूर्यः सविता रविलोचनः ८४ अनंतोहुतभुग्भोक्ता सु
खदो नैकदोग्रजः अनिर्विणः सदामर्षी लोकाधिष्ठानमद्भुतः ८५
सनात्सनातनतमः कपिलः कपिरव्ययः स्वस्तिदः स्वस्तिकृत्स्वस्तिः स्व
स्तिभुक्स्वस्तिदक्षिणः ८६ अरौद्रः कुंडलीचक्री विक्रम्यूर्जितशासनः।

राम:
८